नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 27

# P—95—Sanskrit (V)

No. of Printed Pages — 7

# प्रवेशिका परीक्षा, 2013

## संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. ''नपुंसकाच्च'' इति सूत्रस्यार्थं लिखत । 1

2. निर्देशानुसारं रूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) सर्व-शब्दस्य चतुर्थीविभक्तेः ।

(ब) हरि-शब्दस्य प्रथमाविभक्तेः ।

3. निम्नपदयोः मूलशब्दं विभक्तिं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) त्वया

(ब) रमया ।

4. निर्देशानुसारं धातुरूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) 'नृत्' धातोः लट् लकारे उत्तमपुरुषस्य रूपाणि लिखत ।

(ब) 'प्रच्छ' धातोः लृट् लकारे प्रथमपुरुषस्य रूपाणि लिखत ।

5. निम्नपदयोः लकारं पुरुषं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) हन्ति

(ब) अत्स्यति ।

6. वाच्य-परिवर्तनं कुरुत — 1 + 1 = 2

(अ) त्वं गृहं गच्छसि ।

(ब) लतया पुस्तकं पठ्यते ।

7. ''दण्डेन घटः'' इत्यत्र तृतीया केन सूत्रेण भवति ? 2

8. घिसंज्ञा, अपृक्तसंज्ञा च सूत्रे विलिख्य तयोः अर्थोऽपि लेख्यः । 1 + 1 = 2

9. याडापः, न तिसृचतसृ, ऋन्नेभ्यो ङीप् इति सूत्रेषु **द्वयोः** सूत्रयोः अर्थो लेख्यः । $1 + 1 = 2$

10. कृन्मेजन्तः, स्वरादिनिपातमव्ययम् , तद्धितश्चासर्वविभक्तिः इति सूत्रेषु द्वयोः सूत्रयोः अर्थो लेख्यः । $1 + 1 = 2$

11. अकथितं च सप्तम्यधिकरणे च इत्यनयोः सूत्रयोः सोदाहरणम् अर्थो लेख्यः । $1\frac{1}{2} + 1\frac{1}{2} = 3$

12. निम्नाङ्कितेषु छन्दःसु कयोश्चित् **द्वयोः** लक्षणोदाहरणानि लेख्यानि — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) शार्दूलविक्रीडितम्

(ब) हरिणी

(स) मालिनी ।

13. अधोलिखितेषु अलङ्कारेषु **द्वयोः** लक्षणमुदाहरणञ्च लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) दृष्टान्तः

(ब) परिकरः

(स) उपमा ।

14. प्रातः, युगपत्, पृथक्, दिवा एषु त्रयाणाम् अव्ययपदानाम् अर्थं विलिख्य वाक्य-प्रयोगः करणीयः । $1 + 1 + 1 = 3$

15. निम्नलिखितशब्दानां पर्यायत्रयं लिखत — $1 + 1 + 1 + 1 = 4$

(i) स्त्री

(ii) पुत्री

(iii) पिता

(iv) शरीरः ।

16. अधोलिखितेषु प्रश्नेषु यथेच्छं **चत्वारः** प्रश्नाः समाधेयाः 1 + 1 + 1 + 1 = 4

(i) पृथ्वीं के धारयन्ति ?

(ii) पाप संहारिणी नदी काऽस्ति ?

(iii) लक्ष्मीः कं नरम् उपैति ?

(iv) देवाः कैः प्रसन्नाः भवन्ति ?

(v) ब्रजमाधुरी कुत्र नास्ति ?

(vi) अस्वप्नाः देवा अप्रमादं कां रक्षन्ति ?

17. निम्नलिखितेषु प्रश्नेषु यथेच्छं **पञ्च**प्रश्नाः समाधेयाः 1 + 1 + 1 + 1 + 1 = 5

(i) पुत्रे मुर्खे सति मनुजः कीदृशावस्थां प्राप्नोति ?

(ii) को बभूव वर्धमानः ?

(iii) धनार्थं क एक उपायः शस्यते ?

(iv) उदकार्थं सिंहः कुत्रागच्छत् ?

(v) दमनकः सिंहं किम् पृच्छत् ?

(vi) उत्तम भृत्याः कदा राजानं त्यजन्ति ?

(vii) आगते बिडाले मूषकः किम् करोत् ?

18. अधोलिखितयोः कथयोः **एकस्याः** सारांशं संस्कृते लिखत — 2

(i) धन-प्रभावः

(ii) दुष्टबुद्धिः दमनकः ।

19. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

रामस्य, निर्जरः, हरी, ना ।

20. निम्नलिखितेषु प्रयोगेषु **द्वौ** प्रयोगौ साधनीयौ — $2\frac{1}{2} + 2\frac{1}{2} = 5$

मत्याम् , तिसृभिः, श्रियाम् , स्वसा ।

21. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

ज्ञानानि, वारिणे, दध्ना, प्ररि ।

22. अधोलिखितेषु प्रयोगेषु **पञ्च** प्रयोगाणां ससूत्रं विभक्तिं निर्दिशत — 1 + 1 + 1 + 1 + 1 = 5

(i) तण्डुलान् ओदनं पचति

(ii) अधितिष्ठति वैकुण्ठं हरिः

(iii) मासं कल्याणी

(iv) जटाभिस्तापसः

(v) विप्राय गां ददाति

(vi) ब्रह्मणः प्रजाः प्रजायन्ते

(vii) कटे आस्ते

(viii) राज्ञः पुरुषः ।

23. **कस्याप्येकस्य** गद्यांशस्य सप्रसङ्गं व्याख्या कार्या — 3

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र धर्मोपार्जितभूरिविभवो वर्धमानो नाम वणिक्पुत्रो बभूव । तस्य कदाचित् रात्रौ शय्यारूढस्य चिन्ता समुत्पन्ना, यत् प्रभूतेऽपि वित्तेऽर्थोपायाश्चिन्तनीयाः, करणीयाश्चेति । पुनश्चेह लोके परोऽपि धनिनां स्वजनायते दरिद्राणां तु स्वजनोऽपि दुर्जनायते अपूज्योऽवन्द्योऽपि धनप्रभावात् पूज्यते वन्द्यते च ।

**अथवा**

एवं पिङ्गलकः सत्कृत्य तं समुवेश्य च स्वयं तदाहाराय स्निग्धमैणेयमानेतुं समुद्यतो बभूव । अत्रान्तरे तस्य सुहृद् सञ्जीवकोऽपि समागतः । स च पिङ्गलकं जिगमिषु मवलोक्यावोचत् देवः । कुत्रैकाकी गन्तुमिच्छति भवान् ? भवतोऽनुजायाहारं दित्सुरहं पृच्छामि भवन्तं यदद्य हतमृगाणां मांसानि क्वेति ।

24. **कस्याप्येकस्य** श्लोकस्य सप्रसङ्गान्वयपूर्वकं व्याख्या कार्या — 3

(i) यच्च तीर्थैः पवित्रैर्व्रतैरूत्सवैः

पर्वभिर्दर्शनीयैः स्थलैः शोभितम् ।

यच्च नानाजयन्तीगणैः राजितं

भूतले भाति मेऽनारतं भारतम् ॥

(ii) विपदि धैर्यमथाभ्युदये क्षमा,

सदसि वाक्पटुता युधि विक्रमः ।

यशसि चाभिरुचिर्व्यसनं श्रुतौ,

प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

25. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसङ्गान्वयपूर्वकं भावार्थो लेख्य — 3

(i) वृत्तं यत्नेन संरक्षेद्, वित्तमेति च याति च ।

अक्षीणो वित्ततः क्षीणो, वृत्ततस्तु हतो हतः ॥

(ii) वर्षागमे चारू मरूं विहाय

क्वान्यत्र कस्यापि रमेत चित्तम्

सरःसु वर्षासमयेऽपि यस्मिन्

शरत्प्रसन्नं सलिलं चकास्ति ॥

26. **कमप्येकं** विषयमवलम्ब्य शतपदेषु संस्कृते निबन्धो लेखनीयः — 4

(i) संस्कृतभाषाया महत्त्वम् ।

(ii) अस्माकं विद्यालयः ।

27. विद्यालयस्य वार्षिकोत्सवावसरे मन्त्रिमहोदयाय आमन्त्रण-पत्रं लिखत । 3

**अथवा**

अहमस्मि सुरेशः इति मत्वा राजकीय प्रवेशिका संस्कृत विद्यालय, जयपुरस्थस्य प्रधानाध्यापकाय दिनत्रयस्य अवकाशाय प्रार्थनापत्रं लिखत ।